सप्तमः पाठः

# सुलभसौख्यं बालत्वम्

महाकविभवभूति: संस्कृतसाहित्यस्य महान् नाटककार: आसीत् । भवभूति: विदर्भमण्डलस्य पद्मपुरग्रामवासी आसीत् । तस्य पितु: नाम नीलकण्ठ: मातु: नाम जतुकर्णी चासीत् । तेन विरचितानि त्रीणि नाटकानि – ''मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितम्'' चेति प्रसिद्धानि सन्ति ।

उत्तररामचरिते भगवतो रामस्य उत्कृष्टं चरितं विद्यते । अन्ततः सीतारामयो: पुनर्मेलनेन एतन्नाटकं सुखान्तमस्तीत्यस्य वैशिष्ट्यम् । एषा तस्य प्रोढतमा रचना । अयं नाट्यांश: उत्तररामचरितात् गृहीत: ।

## पात्रपरिचय:

**कौशल्या** - रामस्य जननी ।

**लव:** - रामस्य पुत्र: ।

**जनक:** - सीताया: पिता ।

**अरुन्धती** - गुरो: वशिष्ठस्य पत्नी ।

**वटव:** - आश्रमस्य शिशव:

**(तत: प्रविशति लवमुत्सङ्गे गृहीत्वा लालयन्ती कौशल्या अरुन्धती, जनकश्च)**

**कौशल्या** - तात ! अस्ति ते माता ? संस्मरसि वा ताम् ?

**लव:** - नहि ।

**कौशल्या** - तत: कस्य त्वम् ?

**लव:** - भगवतो वाल्मीके: ।

**कौशल्या** - अयि तात, कथयितव्यं कथय ।

**लव:** - एतावदेव जानामि ।

**(नेपथ्ये)**

(भो: भो: सैनिका:, एष खलु कुमारश्चन्द्रकेतुराज्ञापयति न केनचिदाश्रमाभ्यर्णभूमय: आक्रमितव्या: इति ।)

**अरुन्धतीजनकौ** - अये ! मेध्याश्वरक्षाप्रसङ्गात् उपागतो वत्स: चन्द्रकेतुर्द्रष्टव्य इत्यसौ सुदिवस: ।

**कौशल्या** - अहो ! वत्सलक्ष्मणस्य पुत्रक आज्ञापयति इत्यमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते ।

**लव:** - आर्य ! क एष चन्द्रकेतुर्नाम ?

**जनक:** - जानासि रामलक्ष्मणौ दाशरथी ?

**लव:** - एतावेव रामायणकथापुरुषौ।

**जनक:** - अथ किम् ?

**लव:** - तत्कथं न जानामि ?

**जनक:** - तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

**लव:** - उर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेः दौहित्रः।

**अरुन्धती** - (विहस्य) आविष्कृतं कथाप्रावीण्यं वत्सेन।

**जनक:** - (विचिन्त्य) यदि त्वमीदृशः कथायामभिज्ञः तद् ब्रूहि तावत्, पृच्छामः। तेषां दशरथस्य पुत्राणां कियन्ति, किन्नामधेयानि अपत्यानि, केषु वा दारेषु प्रसूतानि ?

**लव:** - नायं कथाविभागोऽस्माभिः अन्येन वा श्रुतपूर्वः।

**जनक:** - किं न प्रणीतः कविना ?

**लव:** - प्रणीतो, न प्रकाशितः। तस्य कोऽप्येकदेशः प्रबन्धान्तरेण रसवान् अभिनेयार्थः कृतः। तं च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भगवतो भरतस्य तौर्यत्रिकसूत्रधारस्य।

**जनक:** - किमर्थम् ?

**लव:** - स किल भगवान् भरतः तमप्सरोभिः प्रयोजयिष्यति इति।

**जनक:** - सर्वमिदमाकूततरमस्माकम्।

**लव:** - महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था। यतो येषामन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितं तेषामनुयात्रिकश्चापपाणिः प्रमादापनोदार्थम् अस्मद् भ्राता प्रेषितः।

**कौशल्या** - भ्रातापि तेऽस्ति ?

**लव:** - अस्त्यार्यः कुशो नाम।

**कौशल्या** - ज्येष्ठ इति भणितं भवति।

**लव:** - एवमेतत्। प्रसवानुक्रमेण स किल ज्यायान्।

**जनक:** - किं यमजावायुष्मन्तौ ?

**लव:** - अथ किम् ?

**जनक:** - वत्स, कथय, प्रकाशितः कथाप्रबन्धस्य कीदृशः पर्यन्तः ?

**लव:** - अलीकपौरापवादोद्विग्नेन राज्ञा निर्वासितां देवयजनसम्भवां सीतादेवीम् आसन्नप्रसववेदनाम् एकाकिनीमरण्ये लक्ष्मणः परित्यज्य प्रतिनिवृत्त इति।

**कौशल्या** - हा ! वत्से मुग्धमुखि, क इदानीं ते शरीरकुसुमस्य झटिति दैवदुर्विलासपरिणाम एकाकिन्या निपतितः ?

**जनक:** - हा ! वत्से,

*नूनं त्वया परिभवं च वनं च घोरं*
*तां च व्यथां प्रसवकालकृतामवाप्य।*
*क्रव्यादगणेषु परितः परिवारयत्सु*
*संत्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि॥*

**लवः** - (अरुन्धतीं प्रति) आर्ये कावेतौ ?

**अरुन्धती** - इयं कौशल्या, अयं जनकः।

(लवः सबहुमानखेदकौतुकं पश्यति)

(प्रविश्य सम्भ्रान्ता वटवः)

**वटवः** - कुमार कुमार, अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते। सोऽयमधुनास्माभिः स्वयं प्रत्यक्षीकृतः।

**लवः** - अश्वोऽश्व इति नाम व्रतपशुसमाम्नाये सङ्ग्रामिके च पठ्यते। तद् ब्रूत कीदृशः ?

**वटवः** - अरे श्रूयताम्।

*पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं*
*दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।*
*शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्*
*किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः॥*

(इत्यजिने हस्तयोश्चाकर्षन्ति)

**लवः** - (सकौतुकोपरोधविनयम्) आर्याः, पश्यत। एवमेभिर्नीतोऽस्मि।

(इति त्वरितं परिक्रामति)

**अरुन्धतीजनकौ** - पूरयतु कौतुकं वत्सः।

## शब्दार्थः

उत्सङ्गे - क्रोडे (गोद में)। द्रष्टव्यम् - दर्शनीयम् , अवलोकनीयम्। सुदिवसः - शुभदिवसः। दाशरथी - दशरथस्य पुत्रौ। विचिन्त्य - चिन्तयित्वा (चिन्तनं कृत्वा)। व्यसृजत् - रचितवान्। तौर्यत्रिकम् - नृत्य-गान-वाद्यसमवेतम्। आकूतम् - प्रयोजनम्। अन्तेवासिनः - आश्रमवासिनः शिष्याः। अनुयात्रिकः - सहचरः। झटिति - त्वरितम् (शीघ्रातिशीघ्रम्)। क्रव्यादगणेषु - मांसाहारिसमूहेषु। कौतुकम् - आश्चर्यम्। धुनोति - क्षुब्धं करोति, आन्दोलयति। अजस्रम् - अविच्छिन्नम् (अनवरतम्)। शष्यम् - नवीनं ग्रासम्। यामः - गच्छामः।

## अभ्यासः

1. **एकपदेन उत्तरत -**

(क) चन्द्रकेतुः कस्य रक्षाप्रसङ्गात् उपागतः ?

(ख) दाशरथी कौ ?

(ग) लक्ष्मणस्य पुत्रः कः ?

(घ) लवः किमर्थं प्रेषितः ?

(ङ) कुशस्य भ्राता कः अस्ति ?

**2. एकवाक्येन उत्तरत –**

(क) राजा केन कारणेन सीतां निर्वासिताम् अकरोत् ?
(ख) मैथिलस्य राजर्षेः दौहित्रः कः ?
(ग) कौशल्यायाः लवकुशाभ्यां सह कः सम्बन्धः अस्ति ?
(घ) मैथिलस्य राजर्षेः पुत्री का ?
(ङ) रामायणकथापुरुषौ कौ ?

**3. रिक्तस्थानानि पूरयत –**

(क) कुमारः ............................ आज्ञापयति न केनचिदाश्रमाभ्यर्णभूमयः आक्रमितव्याः।
(ख) विचिन्त्य = वि + ............ + ...............।
(ग) अस्ति + आर्यः = .................................।
(घ) निर्वासितां ..................... परित्यज्य लक्ष्मणः प्रतिनिवृत्तः।
(ङ) ............................. स भवति ........................ चत्वार एव।

**4. युग्ममेलनं कुरुत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | दाशरथी | क्त्वाप्रत्ययः |
| (ख) | तौर्यत्रिकसूत्रधारस्य | चन्द्रकेतुः |
| (ग) | नूनम् | अव्ययम् |
| (घ) | उर्मिला | रामलक्ष्मणौ |
| (ङ) | गृहीत्वा | भरतस्य |

**5. मूलशब्दं विभक्तिं वचनञ्च चिनुत –**

| पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| कस्मै | | | |
| तस्मात् | | | |
| युवाभ्याम् | | | |
| अस्माभिः | | | |
| एभिः | | | |

मूलशब्दः: युष्मद्, इदम्, अस्मद्, किम्, तत्

विभक्तिः: तृतीया, प्रथमा, पञ्चमी, तृतीया, चतुर्थी

वचनम्: एकवचनम्, बहुवचनम्, द्विवचनम्, बहुवचनम्, एकवचनम्

**6. अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनञ्च लिखत –**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) कथय | | | | |
| (ख) श्रूयन्ते | | | | |
| (ग) जानासि | | | | |
| (घ) ब्रूहि | | | | |
| (ङ) निपतितः | | | | |

**7. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) उपागत:

(ख) इत्यमृतम्

(ग) एतावेव

(घ) किन्नाम

(ङ) कोऽप्येकम्

(च) अस्त्यार्य:

(छ) यमजावायुष्मन्तौ

**8. अधोलिखितान् अव्ययान् आधृत्य वाक्यनिर्माणं कुरुत –**

(क) अथ

(ख) इति

(ग) किल

(घ) तावत्

(ङ) हा !

**9. अधोलिखितपदान्याधृत्य प्रश्ननिर्माणं कुरुत –**

(क) कस्य

(ख) किम्

(ग) कथम्

(घ) कीदृश:

(ङ) कौ

**10. नाट्यांशमाधृत्य अश्वस्य वर्णनं कुरुत।**

**योग्यताविस्तार: –**

- सुलभसौख्यं बालत्वम् इति पाठं कथारूपेण लिखत।
- समीपस्थम् आश्रमं दृष्ट्वा तस्य सौन्दर्यं वर्णयत।